## निष्ठायां सेटि। (५२/३०५७)

निष्ठायां सेटि परतो णेर्लोपो भवति। कारितम्। हारितम्। गणितम्। लक्षितम्। सेटि इति किम्? [1]संज्ञपितः पशुः। [2]सेड्ग्रहणसामर्थ्यादिह पूर्वेणापि न [3]भवति। सनीवन्तर्ध (७. २. ४९/२६२८) इति ज्ञपेरिटि विकल्पिते 'यस्य विभाषा' (७. २. १५/३०२५) इति निष्ठायां प्रतिषेधः। अथ पुनः एकाचः इति तत्रानुवर्तते, तदा नित्यमत्र भवितव्यम् एव इडागमेन इति सेड्ग्रहणमनर्थकम्? तत् क्रियते [4]कालावधारणार्थम्, इडागमे कृते णिलोपो यथा स्यात्। अकृते हि तत्र णिलोपे सति कारितम् इत्यत्र 'एकाच उपदेशेऽनुदात्तात्' (७. २. १०/२२४६) इति इटः प्रतिषेधः प्रसज्येत॥

## जनिता मन्त्रे। (५३/३५४२)

जनिता इति मन्त्रविषये इडादौ णिलोपो निपात्यते। 'यो नः पिता जनिता' (ऋ. १०. ८२. ३)। मन्त्रे इति किम्? जनयिता॥

## शमिता यज्ञे। (५४/३५४३)

यज्ञकर्मणि शमिता इति इडादौ तृचि णिलोपो निपात्यते। शृतं हविः शमितः। तृचि सम्बुद्ध्यन्तमेतत्। यज्ञे इति किम्? शृतं हविः [5]शमयितः॥

## अयामन्ताल्वाय्येत्न्विष्णुषु। (५५/२३११)

आम् अन्त आलु आय्य इत्नु इष्णु [6]इत्येतेषु परतः णेः अयादेशो भवति। कारयाञ्चकार। हारयाञ्चकार। अन्त – गण्डयन्तः। मण्डयन्तः। आलु – स्पृहयालुः। गृहयालुः। आय्य – '[7]स्पृहयाय्यः' (ऋ. ६. १५. १२)। गृहयाय्यः। इत्नु – स्तनयित्नुः। [8]इष्णु – 'पोषयिष्णुः' (मै. ४. २. १४)। पारयिष्णवः। न इति वक्तव्ये अयादेशवचनमुत्तरार्थम्॥

## ल्यपि लघुपूर्वात्। (५६/३३३६)

ल्यपि परतो लघुपूर्वाद्वर्णादुत्तरस्य णेः अयादेशो भवति। प्रणमय्य, प्रतमय्य, प्रदमय्य, प्रशमय्य, सन्दमय्य गतः। प्रबेभिदय्य गतः। प्रगणय्य गतः। ह्रस्वयलोपाल्लोपानामसिद्धत्वं न भवति असमानाश्रयत्वात्, ह्रस्वादयो हि णौ, ल्यपि णेरयादेशो भवति। लघुपूर्वात् इति किम्? प्रपात्य गतः॥

## विभाषाऽऽपः। (५७/३३३७)

आप उत्तरस्य णेर्ल्यपि परतो विभाषा अयादेशो भवति। प्रापय्य गतः, प्राप्य गतः। इङादेशस्य लाक्षणिकत्वान् न भवति, अध्याप्य गतः॥

---

1. सञ्ज्ञप्तः क. ह. 2. सेड्ग्रहणम् ड. फ, इट्ग्रहणम् क. 3. भवितव्यम् फ. ह. 4. कालावधारणार्थम् नास्ति क. 5. शमयिता ड. फ. 6. इत्येषु फ. 7. नास्ति ड. 8. इष्णुच् ह.